# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा- शास्त्रिद्वितीयवर्षम्(SEM- ४) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | कोड – CC.2.4.7 | समयः - ३:०० तः ६:०० |
| दिनाङ्कः - ०३-०४-२०१९ | सन्दर्भग्रन्थः – वैयाकरणसिद्धान्तकौमुदी महाभष्यञ्च \| | |

.......................................................................................................................

प्रथमान्वितिः

**प्रश्नः-१ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या |** १०

(१) रदाभ्यां निष्ठातो नः पूर्वस्य च दः|

(२) संयोगादेरातो धातोर्यण्वतः |

(३) अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः |

**प्रश्नः२ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या |** १०

(१) ग्लानः (२) शीर्णः (३) स्फीतः (४) अमितः (५) लूनः

(६) भित्तम् (७) शूनः (८) तूर्णः

द्वितीयान्वितिः

**प्रश्नः-३ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या |** १०

(१) भुवश्च |

(२) दीर्घजिह्वी च छन्दसि |

(३) रक्षोयातूनां हननी |

**प्रश्नः-४ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या |** १०

(१) प्रभ्वी (२) हैमन्तिकम् (३) बैल्वो यूपः

(४) वासन्तिकम् (५) शरमयं बर्हिः (६) दूत्यम्

तृतीयान्वितिः

**प्रश्नः-५ कयोः अपि द्वयोः उत्तरे लेख्ये |** १०

(१) व्याकरणशब्दस्य कः पदार्थः इति भाष्यदिशा व्याख्यात |

(२) अप्रयुक्ताः शब्दाः सन्ति न वा इत्यस्य विषये भाष्यदिशा चर्चाः विधत्त |

(३) चतुर्दशसूत्र्या महर्षिणा पाणिनिना यः वर्णानामुपदेशः कृतः तस्य प्रयोजनानि भाष्यदिशा उल्लेख्यानि |

**प्रश्नः-६ कस्यापि एकस्य सविस्तरमुत्तरं लेख्यम् |** १०

(१) कं पदार्थं मत्वा एषः विग्रहः क्रियते 'सिद्धे शब्दे अर्थे सम्बन्धे च' इति भाष्यदिशा ज्ञापयत |

(२) शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे इति भाष्यदिशा चर्चयत |

**प्रश्नः-७** **निम्नलिखितेषु दशप्रश्नानां लघूत्तरं लेख्यम् |** १०

(१) निष्ठा-संज्ञा कयो: प्रत्यययोः भवति ?

(२) रेफात् परस्य निष्ठा तकारस्य स्थाने कः आदेशो भवति ?

(३) अरित्रशब्दे कः प्रत्ययः ?

(४) 'दाप्' धातो: ष्ट्रन्-प्रत्यये कृते किं रूपं सिद्ध्यति ?

(५) भिक्षुशब्दे कः प्रत्ययः ?

(६) 'वर्चस्या:' इत्यस्य कः अर्थः ?

(७) 'आसुरी' शब्दे 'असुर' शब्दात् 'अण्' प्रत्यय: कस्मिन् अर्थे वर्तते ?

(८) 'अग्रिय:' इत्यत्र 'अग्र' शब्दात् कः प्रत्ययः दृश्यते ?

(९) 'वैशन्ती' शब्दे 'अण्' प्रत्यय: कस्मिन् अर्थे वर्तते ?

(१०) 'पाथ्य' शब्दे पथिन् शब्दात् भवे अर्थे कः प्रत्ययः वर्तते ?

(११) शब्दोपदेश-अपशब्दोपदेशयोः कः ज्यायान् ?

(१२) कः इन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच ?

(१३) कं पदार्थं मत्वा पाणिनिना 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रं प्रणीतम् ?

(१४) 'सिद्धे शब्दार्थसम्बन्धे' इत्यत्र सिद्धशब्दस्य कः अर्थः ?

(१५) वार्तिककारः मङ्गलार्थम् आरम्भे कं शब्दं प्रयुङ्क्ते ?